प्रवर्तक आचार्य - जैन...

॥ ॐ ह्रीँ श्रीँ पार्श्वनाथाय नमः ॥

विश्ववंदनीय तपोनिष्ठ–तपागच्छाधिपति पं. श्रीदयाविमलगणि–श्रीमत्शान्तमूर्ति पं. श्रीसौभाग्यविमलगणिपादपद्मेभ्यो नमः ॥

सकलसिद्धांतवाचस्पति–अनेकसंस्कृतग्रन्थप्रणेता पू. पंन्यासप्रवर श्रीमुक्तिविमलगणिविरचितः

# ॥ पद्यात्मकोपदेशप्रदीपः ॥

## अथ मंगलाचरणानि

॥ द्रुतविलम्बितं वृत्तम् ॥

त्रिदशनाथललामशिरोवर–मुकुटरागसुशोभितपादकः । कमठयोगितमोहरभास्करो, जयतु पार्श्वविभुः शिवपार्श्वकः ॥ १ ॥

शिवविभूतिविभावितदेहको, निखिलजीवनताङ्घ्रिसरोरुहः । वरतपःक्षपिताखिलपापको, जयतु वीरविभुर्जनतारकः ॥ २ ॥

रविविभाजयिनी सुखदायिनी, निखिलजीवनिकायशिवार्थिनी । विगतमोहततिर्जिनसन्तति–र्हरतु पापमलञ्जयताच्चिरम् ॥३॥

कमलविष्टरमध्यविराजिता, सितमराललललामतनुस्थिता । निखिलजाड्यहरामतिमुत्तमां, दिशतु विश्वनुता सुरभारती ॥ ४ ॥

उद्यन्महामोहगदान्तकारी, दिव्यत्तपागच्छनभोनभस्वान् । प्रद्युम्नबाणानलतोयधारी, जीयाद्दयाविमलसद्गुरुः कौ ॥ ५ ॥

भव्योल्लसद्भावजिनाध्वरागिणो, दुर्दान्तवाजीन्द्रियवश्यकारिणः।सद्धर्मपोतारितविश्वदेहिनो,वन्दे च सौभाग्यमहामुनीश्वरान्॥६॥

श्रीमद्यादिप्रथमानकीर्ति–सौभाग्यपंन्यासगुरुप्रणामी । पंन्यासमुक्तिविमलो विधत्ते, नाम्नोपदेशादिप्रदीपशास्त्रम् ॥ ७ ॥
यद्यपि सन्ति ग्रन्थरत्नानि, सन्ति भान्ति प्रभाभरैः । आकर्षयन्ति चेतांसि, जैनागममहोदधौ ॥ ८ ॥
तेषाञ्छायां समाश्रित्य, स्वात्मानुभावतस्तथा । कुर्वे बोधाय बालाना–मुपदेशप्रदीपकम् ॥ ९ ॥

अथ स्वचिन्तनोपक्रमः॥ काव्यालङ्कारसद्युक्तिः [illegible] गुम्फ[illegible] करिष्ये परमस्य शम्॥ १०॥ दोषक्षा-रमपाकृत्य गुणरत्नजिघृक्षया । विलोक्यतामयम्विज्ञै–रुपदेशमहोदधिः ॥ ११ ॥ निर्दोषः सुतराङ्कश्चित् सदोषो नितरान्तथा । विद्यते न च ना लोके यतो द्वन्द्वमयञ्जगत् ॥ १२ ॥ शैत्यं हिमालये दोषः सिन्धौ क्षारत्वमित्यपि । प्रायो दोषोऽस्ति सर्वत्र त्यक्त्वा केव-लिनम्विभुम् ॥ १३ ॥ सन्ति सन्तः सदा सन्तः स्वभावादेव भूतले । दुर्जना अपि तादृशाः सन्तूपदेशपानतः ॥ १४ ॥ अपास्य गुणरत्नानि द्वेषक्ष्वेडमलन्तराम् । गृह्णन्ति दुर्धियः प्रायो विशीर्यन्ते यतः स्वयम् ॥ १५ ॥ गुणपीयूषपानेहाः सदा सन्तु शिवार्थिनः । हंसवृत्तिं समाश्रित्य विलसन्तु यथासुखम् ॥ १६ ॥

अथ ग्रन्थारम्भः ॥ सुपात्रे भाति सद्विद्या मुकुरान्तर्यथाऽऽननम् । कलाऽपि विलसत्यस्मिन् रक्तिमेव सुवाससि ॥ १७ ॥ कुपात्रेऽनर्थकारिण्यः कलाविद्यारमादयः । जायन्ते कुसुते शिक्षा गुरूणामिव दुर्धियि ॥ १८ ॥ सन्न्यायपथमाश्रित्य व्यवहरन्ति ये नराः । त एव सत्त्वसङ्कल्पास्त एव सत्यभाषिणः ॥ १९ ॥ धर्म एव सखा लोके गरीयान् दुःसहा तथा । सरीसर्ति नरीनर्ति तेनैवेप्सितधामनि ॥ २० ॥ उद्यमादपरो नास्ति मित्रं सत्सौख्यकारकः । विद्यातुल्यं धनं नास्ति यद्धि कैश्चिन्न गृह्यते ॥ २१ ॥

* पंन्यास मुक्तिविमलगणिः ।

अमात्यश्चारुचारित्रो राज्यभूषणमुच्यते । समुद्रस्येव गाम्भीर्यं देहस्याऽपि तथैव च ॥ २२ ॥ विद्यैव विमला लोके सौष्ठवाकृति-
रञ्जिनः । भूषणञ्चापि देहस्य धर्माध्वगतिरुत्तमम् ॥ २३ ॥ आलस्यादिमहादोषा देहिनां दूषणं भृशम् । कुनीत्यादिदुराचारो
राज्यदूषणमुच्यते ॥२४॥ सति रूपे च मूर्खत्वं दूषणं दूषणोत्तरम् । लब्ध्वा नृजन्म दुष्प्राप्यं धर्माभावो हि दूषणम् ॥२५॥ धर्मतः
कमलाप्राप्तिः धर्मेणापि महद्यशः । धर्मेण मघवाल्लोकस्ततः श्रेयः शिवात्मकम् ॥ २६ ॥ इहवर्गाश्च चत्वारः क्रमशः दर्शिता बुधैः ।
प्रथमे सिद्धिमायाते त्रयोऽपि पाणिगाः सुखम् ॥ २७ ॥ मन्त्रिणि भेदमायाते वशीभूतेऽथवा तदा । राज्यलक्ष्मीश्च प्राप्तैव सति
ज्ञानेऽमृतं यथा ॥२८॥ प्रियम्ब्रूयात्प्रियंब्रूयाच्च चेत् तद् वितथाथितम् । भवन्ति वशिनो लोके वैरिणोऽपि प्रियोक्तिभिः ॥ २९ ॥
विद्यालङ्कार एवास्ति भूषणं नरदेहिनः । परनिन्दाऽपवादश्च दूषणं नरदेहिनः ॥३०॥ विषयादिषु या तृष्णा सा तृष्णा क्लेशकारिणी ।
तत्समा नोऽपरा चिन्ता तत्क्षये सति शान्तिता ॥३१॥ विषयाः पञ्च शब्दाद्या नरैणदृढवागुरा । ज्ञात्वा किम्पाकवत्तांश्च यान्ति दूरे
विवेकिनः ॥३२॥ सन्तोषामृतपानाज्जगतीयं तृणायते । तस्मात्सन्तोषसत्प्राप्त्यै यत्नश्चात्र विधीयताम् ॥३३॥ सन्तोषोत्तमपाथेयं
गृहीत्वा यान्तु यत्र वा । न तृष्णारोगभीस्तेषां निर्द्वन्द्वा भान्ति ते सदा ॥ ३४ ॥ अष्टादशकपापानि सप्तैव व्यसनानि च । भव्यै-
स्त्याज्यानि सद्भूतैस्त्याज्या पापमतिस्तथा ॥ ३५ ॥ ज्ञानं सुधार्यं हृदि पुण्यशीले धार्यं तपस्तप्यमपारि नित्यम् । पूजा सुकार्या
जिनपुङ्गवानां भक्तिर्गुरोर्हृद्यतमोद्यमश्च ॥ ३६ ॥ इति सामान्योपदेशः ॥

अथ प्राणातिपातोपक्रमः ॥ येषाङ्केषाञ्च जीवानां प्राणानामतिपातनम् । प्राणातिपात इत्याहुः सर्वज्ञा ज्ञानभासुराः ॥३७॥
यथा प्राणाः प्रियाः स्वस्य तथाऽन्यस्यापि सद्धिया । ज्ञात्वेति परप्राणानां नो बाधा क्रियतां क्वचित् ॥३८॥ आयाति यदि रक्षार्थी

द्वेष्योऽपि तृणवक्त्रकः । सतां सोऽपि न वा हिंस्यः किमुत तृणभक्षकः ॥३९॥ न धर्मो जातु दृष्टश्च श्रुतोऽपि शास्त्रविस्तरे । हिंसामयः परक्षाङ्गे–दूषितोऽन्यत्तया न किम् ? ॥४०॥ *प्रमादवति कुतो विद्या निरुद्योगे कुतो धनम् ? कापथ्ये च कुतः सत्त्वंस्तथा धर्मो न हिंसया ॥ ४१ ॥ यथाऽम्भसि निमज्जन्ति शिलया तर्तुमिच्छवः । दुर्गतिं यान्ति तद्वद्धि हिंसाऽध्वचारिमानवाः ॥ ४२ ॥ अथ त्रिभिर्विशेषकम् ॥ लावण्येन विना रूपं विना विद्यां वपुस्तथा । विना वारि सरस्तेन कमलानि न माधुपैः ॥ ४३ ॥ नरम्विना यथा नारी वल्ली पादपमन्तरा । तमीं विना निशानाथो गृहम्पुत्रादिकम्विना ॥ ४४ ॥ शोजम्विना यथा साधुर्नदी नीरम्विना तथा । न शोभते यथा तद्वद् धर्मोऽपि हिंसया तथा ॥ ४५ ॥ ॥ इन्द्रवज्रावृत्तं ॥ स्वात्मादिवत्सर्वमिदम्विविच्य, प्राणातिपातो नरकप्रदाता । नो जातु कार्यो मनसा न चिन्त्यो, भव्यैरिहामुत्रसुखाभिकामैः ॥ ४६ ॥

अथ मृषावादोपक्रमः ॥ स्वचातुर्यप्रकाशाय परवञ्चनहेतवे । मृषा यत्प्रोच्यते वाक्यं मृषावादः स कथ्यते ॥४७॥ न कूटमाषणङ्कार्यम्प्राणान्तेऽपि मुमुक्षुभिः । न सिद्धिस्तेन जायेत प्रत्यवायः पदे पदे ॥४८॥ कुस्त्रीभिसेवनात्सिद्धिः कान्तारे वाऽथ रोदनात् । न दृष्टाऽऽकर्णिता क्वापि तद्वन्मिथ्याऽपि भाषणात् ॥ ४९ ॥ व्याघ्रभीत्या यथा वृद्धिमजो याति न वत्सरैः । सत्यम्विना तथा धर्मो न याति पुष्टितां क्वचित् ॥ ५० ॥ न यशो न च विश्रम्भो न मैत्री चिरस्थायिनी । मिथ्यावादोक्तिशौण्डीरे पदं धत्ते कदा नहि ॥ ५१ ॥ मैत्रीभेदः कलिस्तेन प्रेमाभावश्च शत्रुता । जायते त्याज्य एवायं सत्कुलोद्भवजन्मिभिः ॥ ५२ ॥ असत्यवाग्भाषणदस्युदेः कुर्यान्न विद्वान् खलु पक्षपातम् । दृष्टापवादं नरकम्परत्र संयाति सत्यं वसुराजवच्च ॥ ५३ ॥ उपेन्द्रवज्रावृत्तं ॥

* पुरुषे ।

अथ अदत्तादानोपक्रमः ॥ आज्ञाम्बिना च चौर्येण यद्धनं गृह्यते नरैः । अदत्तादानमित्याहुः सूरयः शास्त्रकोविदाः ॥ ५४ ॥ वन्ध्यासन्ततिवल्लोके वालुकाकणतैलवत् । अदत्ताहारिमर्त्यानां विश्रम्भो न विधीयताम् ॥५५॥ अदत्तवस्तुलाभेन मोदते मूढमानवः । प्राप्तिकाले परन्तस्य विपाकं न च पश्यति ॥५६॥ कुलापमानमादौ स्याच्छ्वभ्रा लोकान्तरे ततः । राजदण्डः क्लेशलाभस्ततो दुर्गति-सम्भवः ॥५७॥ नाहरेत्कस्यचिद्वित्तमदत्तम्भूतिकामुकः । मण्डूकचोरवत्सोऽत्र दुःखभाक् स्यान्निरन्तरम् ॥ ५८ ॥ वरं शाकादिभिर्वृत्ति-र्वरं कष्टेन[1] जीवनम् । उपाददीत नादत्तं महानर्थपरम्परम् ॥५९॥ शकुन्ते कौशिकोऽनिष्टः कृतघ्नो नरराजिषु । अदत्तादानशीलोऽप्यलक्षणोऽनिष्ट एव च ॥६०॥ नोऽदत्तं विधुरेऽपि वस्तु भविभिर्ग्राह्यं नु केषां कचि–च्चेमास्तीह धनञ्च धैर्यमतुलञ्चार्यं सतां लक्षणम् । सिद्धिर्धैर्यवतामुपैति फलतां पश्यन्तु ताँश्चातकान्, मेघाम्भःपरिपानपुष्टतनवो नाभ्यर्थयन्तेऽपरान् ॥ ६१ ॥

अथ मैथुनोपक्रमः ॥ मिथो दारादिभिर्योगो विपाकविरसोपमः । मैथुनमिति विज्ञेयं संसारवृद्धिकारकम् ॥ ६२ ॥ मदनासक्त-चित्तानां मानवानां विवेकता । सत्यपि याति नाशत्वमनीत्येव नृपेन्दिरा ॥६३॥ मयूरीव रमा रम्या बहिरन्तः खलाशया । जिह्वावृत्ति-र्भुजङ्गीव त्याज्येयं सुखकांक्षिभिः ॥६४॥ चक्षुष्मानपि कामान्धो न पश्यति कुलादिकम् । भुजिष्याप्रेमतो मुञ्जो जातोऽकीर्तिभाजनः ॥ ६५ ॥ विहाय नियमान् ये च रमन्ते महिषा इव । सूरिकान्तेव ते यान्ति संभोगाभिरयादिषु ॥ ६६ ॥ सम्वराध्यानमाश्रित्य प्रदेशी नाकमाययौ । चित्तवृत्तिनिरोधो हि सर्वत्र सुखहेतुकः ॥ ६७ ॥ पद्मावतीप्रेमजिताङ्गयष्टिः श्रीकोणिको चेटकराजमिश्च । चक्रे च युद्धं यत वन्धुवैरं राघोतरः श्रीमणिभूपतिश्च ॥ ६८ ॥

---

१ कष्टेऽपि ।

अथ परिग्रहोपक्रमः ।। धनधान्यवस्त्रपात्रादि–वस्तुषु यदि क्रियते ।ममत्वभाव एषो हि प्रोच्यते च परिग्रहः।।६९।। परिग्रही न जानाति कर्तव्यं मूढमानसः । यतोऽस्य शक्तयः सर्वा स्तत्प्रार्जनहेतवः ।।७०।। यथा यथा च जीवोऽप्यङ्कुरोति हा परिग्रहम् । तथा तथा च पापेन लिप्यते नात्र संशयः ।।७१।। प्रथमं मोहवृद्धिश्च मानमुक्तिरनन्तरम् । प्रतिगेहेषु याञ्चा च धिक् परिग्रहचेष्टितम् ! ।।७२।। मूर्खाणां सङ्गतिः क्ष्वेडं तन्द्रिणामुद्यमो विषम् । परिग्रहो हि जन्तूनां कालकूटोपमो मतः ।। ७३ ।। न मानो गुणराशीनां सज्जनानां यथा भुवि । कमलाकेलिलुब्धानां मानो दुःखस्य नो तथा ।। ७४ ।। यथाऽपहरते सर्वं नदीवेगोऽत्र कूलजम् । परिग्रहो न जानाति तद्वत्कृत्यञ्च मोहितः ।। ७५ ।। यथा कामी च कामेन पीड्यते वृद्धोऽपि हा । तथैव पीड्यते हन्त परिग्रही धनेच्छया ।। ७६ ।। सुभूमचक्रीव परिग्रही ना करोत्यजस्रं विविधानुपायान् । प्रयाति चान्ते निरयक्षमायां विनाशिदग्धान्तरपुण्यबीजः ।। ७७ ।।

अथ क्रोधोपक्रमः ।। कोपयति जनान् यश्च शान्तानपि निमित्ततः । स कोपः खलु विज्ञेयः शान्तिः सौधमहाशनिः ।।७८।। कोप एव महाव्याधिः कोप एव महारिपुः । कोप एव च चाण्डालः पिशाचः कोप एव च ।।७९।। नानाऽनर्थमसौ क्रोधी कुरुते ग्रहिलो यथा । निन्द्यते स्वार्थभग्नश्च जायते क्लेशभाक्सदा ।। ८० ।। पुण्योदयमहाशैले कोपो वज्रायते न किम् । केतुरापत्तिदाने यो दुर्गतिमूल एव च ।। ८१ ।। कोपेन हन्ति सत्कीर्तिं कोपेन हन्ति सत्कलाम् । कोपेन हन्ति सन्मानं कोपेन हन्ति सञ्चयम् ।। ८२ ।। कोपेन त्यज्यते लोकैः कोपेन दूयते हृदि । कोपेन हास्यतामेति कोपो हि नितरां रिपुः ।। ८३ ।। रक्तिमा वदने नित्यश्चण्डिमाऽऽकृतिलक्षणे । वैरूप्यं देहभागेषु भाषणे परुषाक्षरम् ।। ८४ ।। विद्यते क्रोधिनः प्रायः क्रोधो हि गुणिमत्सरी । भीता इव ततो यान्ति सद्गुणाः कमलाः कलाः ।। ८५ ।। (युग्मम्) क्रोधाग्निना स्वयम्पूर्वञ्ज्वलत्येष ततोऽपरान् । ज्वलयति महाक्रोधी चोभयानर्थकारकः

॥ ८६ ॥ चिरकालस्थिरप्रीतिं मैत्रीं दानं सुभाषितम्। काष्ठराशिश्च वह्नीव क्षणेन हन्ति कोपनः ॥ ८७ ॥ पश्यन्तोऽपि न कोपभूतकलिताः पश्यन्ति तत्त्वं न च, चेष्टन्ते ग्रहिला इव प्रतिहताः सन्मार्गतः सन्ततम्। कारागारसमुत्थदुःखनिवहं क्लेशान् बहून् कोविदः, [illegible] [illegible] दुःखप्रदम् ॥ ८८ ॥

अथ मानोपक्रमः ॥ नापरो मत्समो लोके चाहं सर्वाधिको गुणैः। मिमीते येन ना चेत्थं मानोऽयं ज्ञायताम्बुधैः ॥ ८९ ॥ कौबेरीव रमा मेऽस्ति रूपं मन्मथसन्निभम्। राज्यश्चापि धराप्रान्तं सपत्नभयवर्जितम् ॥ ९० ॥ सहस्रशो भटाः सन्ति स्यन्दनाश्वगजास्तथा। अप्सरीरूपजित्वर्यः सन्ति नार्योऽपि सद्मनि ॥ ९१ ॥ अहमिन्द्रश्च पाशी च चाहमेव जगत्पतिः। इत्यभिमानमारूढो न यमं मूर्ध्नि पश्यति ॥ ९० ॥ चेष्टितं मानिनश्चित्रं मानी मानेन गर्वितः। वन्दते न गुरूँश्चापि परेषां नमनं कुतः? ॥९२॥ मानमैरेयमाकण्ठं पीत्वा निन्द्यं विचेष्टते। हास्यं नयति स्ववंशं कीर्तिं लुम्पति सर्वतः ॥ ९३ ॥ क्षिप्तोऽपि तैलकासारे शुनः पुच्छो न जातु वै। सरलो जायते तद्वन्मानी न नम्रति क्वचित् ॥ ९४ ॥ दृष्ट्वाऽपि महतो मानी न नमति खलाशयः। आरोपः क्रियते यस्मिन् स्थाणोर्वै सति पूरुषे ॥ ९५ ॥ अज्ञाः सन्तोऽपि विज्ञान् स्वान् मन्यन्ते बत मानिनः। स्वैरिणी सत्यपि वेश्या सतीमन्या विराजते ॥ ९६ ॥ शिष्टोपदिष्टशिक्षान्ते गृह्णन्ति न कदाचन। भारतीं समयोपेतां निष्पुण्या इव मानवाः ॥ ९७ ॥ रूपवन्तोऽपि श्रीमन्तो विद्यावन्तोऽपि सत्कुलाः। एकेन मानदोषेण लघुतां यान्ति भूतले ॥ ९८ ॥ स्रग्धरा ॥ दिग्जेता ख्यातकीर्तिर्निगमपथगतिर्निर्जरश्रीविजेता, प्रद्युम्नाकारमूर्तिः सुरयुवतिपतिः घोरसंग्राममूर्तिः। मानेनैकेन लंकां कनकविरचितां रावणोऽनाशयद्वा, दौर्गत्यक्को-

१ वरुणः। २ मदिरा। ३ पूज्यान्।

णिकोऽप्यालभत वत हता येन के के न भूम्याम् ॥ ९९ ॥

अथ मायोपक्रमः ॥ मीयते कार्यजातैर्या दृश्यते न प्रत्यक्षतः । मायेयं ज्ञायताम्विज्ञैः स्ववशीकरणोद्यमा ॥ १०० ॥ अहो माये कुतोऽशिक्षि विधेयन्त्वयका खले । अनायासेन यत्सर्वान्स्ववशीकुरुषे न किम् ॥ १०१ ॥ हास्यचेष्टात्रचोभङ्गश्चकाणो मुदिताननः । परचेतांसि मायावी युवतीव हरत्यहो ॥ १०२ ॥ सुमिष्टा भारती वक्त्रे विनयोऽपि महत्तरः । विचित्रहावभावश्च मायिनो हरतेऽखिलान् ॥ १०३ ॥ तपो यन्मायया तप्तम् स्त्रीत्वं तेन च लभ्यते । महाबलो मुनिस्तत्र दृष्टान्तो ज्ञायतान्तराम् ॥ १०४ ॥ रूपवत्स्मरूपेत् किञ्च जगतोऽस्य हृते त्वयि । अरूपया त्वया माये ! विश्वं दासीकृतं न किम् ? ॥१०५॥ त्वामाश्रित्य शठा माये ! वञ्चयन्ति परान् भृशम् । प्राप्नुवन्ति महत्कष्टं धीक् त्वां तादृशकारिणीम् ॥ १०६ ॥ त्वद्रागुरापतितमान्यतमोऽपि मर्त्यो, निन्दामुपैति बुधसज्जनवृन्दमध्ये । श्लाघ्योऽपि हन्त ! कपिलो मत मायया वै, लेभे च साधुवनिताकृत धिक्कृतिं सः ॥ १०७ ॥

अथ लोभोपक्रमः ॥ जीवोऽयं येन भावेषु लुभ्यतेऽज्ञानमाश्रितः । दुःखदो ज्ञायतां लोभो विवेकिजनगर्हितः ॥ १०८ ॥ लोभोपहतचेता ना वीक्षते नो हिताहितम् । वादीव वादप्रागल्भो विदुषामपि संसदि ॥ १०९ ॥ न लोभात् सुखवा दृष्टा श्रुता नो कस्यचिन्मुखात् । लभते केवलं क्लेशं न सुखन्तस्य जात्वपि ॥ ११० ॥ स्वातिम्बिना भवेन्मुक्ता तरणी तरतु स्थले । शिलायां पङ्कजम्भूयादुदीयाद्वारुणं रविः ॥ १११ ॥ तृष्णार्तः[1] प्राप्नुयाद्वारि वैदग्ध्यं यातु वा जडः । न सुखं लोभनिघ्नस्य तदपीह विभाव्यताम् ॥ ११२ ॥ (युग्मम्) भुजङ्गादपि लोभोऽयं विशिष्टति धरातले । सापराधे दशत्येष लोभस्तु खलवत्सदा ॥ ११३ ॥

---

१ मृगतृष्णार्तः ।

कुसीदादपि कौसीदं वर्द्धते च यथा शनैः । तद्वल्लोभेन पापोऽपि वृद्धितां याति मन्थरम् ॥११४॥ मद्यपायीव लोभात्मा कुलं शीलं न पश्यति । गणयेन्नापि शिष्टान् स बन्धूनपि न मन्यते ॥ ११५ ॥ राकाविधुज्जलनिधेरिव वीक्ष्य दिव्यम्, वृद्धिं यथोर्मय इह प्रतियान्ति तद्वत् । लोभोऽपि वित्तनिचयं परिवर्द्धतेऽत्र, ज्ञेयोऽत्र मम्मणधनी तत्प्रमुख्यहेतुः ॥ ११६ ॥

अथ रागोपक्रमः ॥ प्रतिबध्नाति यः प्रेमस्वामीष्टवस्तुसन्ततौ । रागोऽयम्बुध्यतां विज्ञैर्नीलिमेव पटादिषु ॥ ११७ ॥ विचित्रः खलु रागोऽयं रज्जुतोऽपि विशिष्यते । तथा च मुच्यते प्राणी नानेन मरणेऽप्यहो ॥ ११८ ॥ कण्टकेनापि दूयन्ते भयेन लघुना तथा । नार्यो यास्तेन सोत्कण्ठा भर्तारमनुयान्ति वै ॥ ११९ ॥ राजानमनुगच्छन्ति यथा भृत्यादयः पुरात् । तथा रागेण संयान्ति देहतश्चाक्षवृत्तयः ॥ १२० ॥ गुणिनि निर्गुणे वाऽथ रागो वस्तुनि जायते । आसज्जयति तत्रैनज्जीवं त्यक्त्वा च गौरवम् ॥ १२१ ॥ अन्यासक्तमना रागी पूर्वमैत्रीं विहाय च । द्वेषङ्करोति तद्धानिं वाञ्छति च दिने दिने ॥ १२२ ॥ शिखरिणीवृत्ते तपः शीलं धर्मं सुचिरकृतमैत्रीं निजयशः, तथा प्रीतिं रागी त्यजति परदारादिविकलः । विपत्तेऽथ द्वेषं दहति हृदये वीक्ष्य परक-मतो दुःखी लोके कनकरथवद्याति निधनम् ॥ १२३ ॥

अथ द्वेषोपक्रमः ॥ स्वार्थमाश्रित्य यो द्वेष्टि भिन्दन्कीर्तिलतामलम् । येन द्वेषः स विज्ञेयो महानर्थकरो भुवि ॥ १२४ ॥ द्वेषेण वर्द्धते कर्म द्वेषेण वर्द्धते रिपुः । द्वेषेण वर्द्धते क्लेशो द्वेषः सर्वक्षयङ्करः ॥ १२५ ॥ द्वेषवह्निश्च यो मूढः प्रज्वाल्य सुखमिच्छति । उदधेः पारयायीव पाषाणेन विनश्यति ॥ १२६ ॥ उपायः कालकूटस्य रोगाणामपि विद्यते । द्वेषकृशानुनाशाय विद्यते न च

१ व्याजात् । २ शनैः ॥

साधनम् ॥ १२७ ॥ यत्र पुंसि पुरा रागो गुणज्ञोऽयं सखा मम । सति द्वेषे च तं हन्ति कामिनीव प्रियम्पतिम् ॥ १२८ ॥ द्वेष–दावानलज्वाला भस्मसात्कुरुतेऽखिलम् । निःस्वी भूय ततो द्वेषी सहते कष्टसन्ततिम् ॥ १२९ ॥ तेनैव कौरवा जाता नामशेषाः परेऽपि च । द्वीपायनेन तेनैव दग्धा सा द्वारिका वरा ॥ १३० ॥ इन्द्रवज्रावृत्तम् ॥ कल्याणपाथोधिविलासबुद्धिर्द्रोहम्विदध्यान्न च कैः सहात्र । प्रीत्या चरन् भद्रशतानि पश्यन्नन्ते गतिं यातु समीहितां सः ॥ १३१ ॥

अथ कलहोपक्रमः ॥–कलहे कालयत्यत्र कलयत्यथ सद्गुणान् । कलहश्च विजानीयुः प्रीतिविच्छेदकारकम् ॥ १३२ ॥ सत्यशीलोऽपि देवर्षिः कलहमूलतो भुवि । कलहादयशो लेभे धिक् कलिं कीर्तिनाशनम् ॥ १३३ ॥ कलहान्तरिता भार्या पुमान् वा यत्र सद्मनि । सद्य एव च तन्नाशो नदीतीरजवृक्षवत् ॥ १३४ ॥ कलहः सर्वदोषाणां मूलमस्ति धरातले । अजीर्णमिव रोगाणां निदानमादिमं मतम् ॥ १३५ ॥ कलहोऽपि महादोषः सत्स्वपि गुणराशिषु । क्षारमब्धौ निशानाथे कलङ्कः केन लुप्यते ? ॥ १३६ ॥ कलहे प्रीतिविच्छेदः कलहे दुःखसन्ततिः । कलहे किल्बिषस्तोमः कलहे विपदः खलाः ॥ १३७ ॥ कलहविषपानेन स्वयं मूर्च्छेज्जनोऽपरान् । मूर्च्छयत्यत्र हा कष्टं विचित्रोऽस्य पराक्रमः ॥ १३८ ॥ कलहो विद्यते यत्र कलिस्तत्रैव नृत्यति । सरीसर्ति रमा दूरं नरीनर्ति विपत्तिका ॥ १३९ ॥ क्लेश एव खलो लोके स्वपरानर्थहेतुकः । भुजङ्गो विषवल्लीव तप्तरेणुक्षितीव वा ॥ १४० ॥ कंसोऽपि भूपान्वयलब्धजन्मा, सङ्ग्रामतः प्राप यशोऽतिसौख्यम् । जज्ञे परञ्जीववशाऽस्य जामिर्येयोगतो वंशयुगस्य नाशः ॥ १४१ ॥

अथाभ्याख्यानोपक्रमः ॥ आख्यानमभितोऽन्यस्य मिथ्यापवाददानतः । अभ्याख्यानञ्च तत्प्रोक्तं त्याज्यमेव बुधैः सदा

---

१ दरिद्री भूय । २ भगिनी ॥

॥ १४२ ॥ अभ्याख्यानं महादोषो मन्ये दोषेषु सज्जनाः । यस्येहारोपतो जीवो भिनत्ति पुण्यसन्ततिम् ॥ १४३ ॥ द्विचन्द्रं नेत्ररोगेण यथा पश्यति कश्चन । जिह्वादोषेण रोगाणां केन वार्यः सद्गुरुः ॥१४४॥ यथाऽधर्मो न दातव्यो [illegible]मानवैः । अभ्याख्यानन्तथा वाच्यं न कदा कस्य लघ्वपि ॥ १४५ ॥ रोगो वह्निः स्तोकतो वृद्धिमेति, तद्वत्क्लेशो योगतो याति वृद्धिम् । कर्म्माप्येवं वृद्धितां याति नित्य–मभ्याख्यानात्प्रत्यवायो महांश्च ॥ १४६ ॥ निन्दको हि यथा पुंसु काकश्च पक्षिषु यथा । तथा कर्मसु कर्मापि चाभ्याख्यानं हि गर्हितम् ॥ १४७ ॥ पराऽपवाददोषो हि महानर्थकरो भुवि । त्यक्ता रामेण सा सीता रजकोक्तिमिषाच्च किम् ॥ १४८ ॥ सुखमिच्छसि भो जीव ! यदि वाञ्छसि सद्गतिम् । अभ्याख्यानश्च कस्यापि न वक्तव्यन्त्वया कदा ॥१४९॥ सौभद्रायाः श्वश्रुस्तस्या मिथ्यात्विन्या निदर्शनम् । शीलाभ्याख्यानतो ज्ञेयं फले वैषम्यमद्भुतम् ॥ १५० ॥ मन्दाक्रान्ता ॥ अभ्याख्यानं गुरुतरमहो दोषमूलं हि मन्ये, द्वेषोत्पत्तिर्नियतगमनं प्रेमविच्छेददाता च । लोके निन्दा भवति नितरां पुण्यसन्दोहनाशो, वासो मध्ये भवति न सतां कीर्तिनाशोऽपि सम्यक् ॥ १५१ ॥

अथ पैशुन्योपक्रमः ॥ परा कृतानि पुण्यानि यद्धि पिनष्टि मूलतः । पैशुन्यं तद्धि विज्ञेयं निन्द्यं निन्द्यतमं यतः ॥१५२॥ वरं मौर्ख्यञ्च मूकत्वं निर्धनत्वम्वरन्तथा । पैशुन्यं न परं श्रेष्ठं महापापनिबन्धनम् ॥ १५३ ॥ आत्मानम्पातयत्येष पैशुन्यदोषतो न किम् ! अनेकैर्दुःखसंघातैः पीड्यते भुवि सन्ततम् ॥ १५४ ॥ न सिद्धिः क्वापि पैशुन्ये परकार्यविघातके । विषवृक्षे समारोपे कुतः स्वादुफलागमः ॥ १५५ ॥ पैशुन्यवृत्तिशीलानां नादरः क्वापि जायते । वाच्यता गुरुता लोके विश्वासघातिनामिव ॥१५६॥ श्लाघामश्नुते धर्मोऽपि दानशीलतपोमयः । यावत्पैशुन्यदोषेण ग्रसितो नो भवेत्पुमान् ॥ १५७ ॥ पैशुन्यमार्गशायी ना तर्जनीं

समविश्रितः । निन्दामाप्नोति सर्वत्र विश्वभात्परिहीयते ॥ १५८ ॥ सत्क्रिया निष्फलास्तस्य दानशौर्यादिकस्तथा । पैशुन्यं यदि जिह्वाग्रे कीर्तिहारि च तिष्ठति ॥ १५९ ॥ पैशुन्याध्वगमीनरः प्रविलम्बन्नाति कर्माघमम् । विश्वासादपहीयते वरजनैर्नो लभ्यते सङ्गतिः । कीर्तिर्नश्यति निन्द्यते प्रतिपदे क्लेशस्तथा प्राप्यते । पैशुन्यञ्च ततस्त्यजन्तु कलिदं श्वभ्रादिहेतुस्तथा ॥ १६० ॥

अथ रत्यरतिप्रक्रमः ॥ विषयेषु च याऽऽसक्तिः पौनः पुन्येन देहिनाम् । रतिरेषा च विज्ञेया विपरीताऽरतिर्मता ॥ १६१ ॥ वृद्धिह्रासस्तयोः पुंसां कर्मणैव विजायते । तादृशं कर्म बध्नीयात् येन सा न्यूनताम्व्रजेत् ॥ १६२ ॥ आदौ भूमिस्ततो बीजन्ततोऽङ्कुरसमुद्भवः । तथा रतिः पुरा भूयोऽरतिश्चाथ ततो व्यथा ॥ ॥ १६३ ॥ सुखभूतानि वस्तूनि विलोक्य खलु मानवः । मुदमेति रते रूपं विज्ञेयं बन्धनोदयम् ॥ १६४ ॥ दोषयुक्तेषु तेष्वेव जायते किल याऽरतिः । उभे ते दोषयुक्तत्वात्त्याज्ये एव विचक्षणैः ॥ १६५ ॥ रतेर्भावेषु गार्ध्यं स्यात् अरतेर्दुःखसन्ततिः । दुःखमुभयतः पुंसामतस्त्याज्ये उभे अपि ॥ १६६ ॥ स्वर्गीयभोगविभवादिकृते रतिर्वै–कार्या न कार्यनिपुणैः किल साऽपि प्रायः । अप्राप्तितोऽरतिरुदेति ततोऽत्रधार्ये, निःस्वार्थमोक्षपदवीमतिराविधेया ॥ १६७ ॥

अथ परपरिवादोपक्रमः ॥ मिथ्यारोपश्च येनाऽत्र क्रियते गुणिषु मुधा । स एव शास्त्रनिष्णातैः परापवाद उच्यते ॥ १६८ ॥ उपेक्षाभावनाजिह्वे स्मृत्वा सञ्चर कर्मणि । सुन्दरे येन ते मोक्षो भविता भववारिधेः ॥ १६९ ॥ रदप्राकाररुद्धाऽपि दन्तच्छदविलासिनि । तथापि कुरुषे मूढे परापवादमाः खले ॥ १७० ॥ परेषां सद्गुणान्वक्तुं यदि जानासि नो मनाक् । तर्हि ते मूकता

१ दन्ताः । २ ओष्ठः । ३ आः इति कष्टे ।

श्राव्या यतो न भवबन्धनम् ॥ १७१ ॥ सादृश्यं शशिनो वक्त्रे दीयते काव्यकोविदैः । परापवाददोषेण रे ! त्वया कल्मषीकृतम् ॥ १७२ ॥ भो जीव ! जीव सततं शुभकर्मणा त्वम्, मिथ्याभिरोपणमहो गुणिषु विना तत् । कार्यङ्करा नहि सखे ! तत एव चात्मा, सम्पात्यतेऽधमगतौ त्यज तन्त्वरैव ॥१७३॥ कर्मणा केऽपि मातङ्गाः[1] केऽपि जात्या तथैव च । ज्ञात्वेति कुरु मा जिह्वे ! परवधादिवार्तासु ॥ १७४ ॥ जिनराजस्य नामानि भज तेषाम्वरान्वनुम् । सर्वेषाञ्चिन्त्य कल्याणमित्यन्ते सद्गतिः करे ॥ १७५ ॥

अथ मायामृषोपक्रमः ॥ मीयते कार्यसन्दोहैर्मायेति प्रोच्यते बुधैः । तत्पूर्वकृतकार्याणि मायामृषेति बुध्यताम् ॥ १७६ ॥ मनसा चिन्तितश्चान्यत्कर्मणा कृतमन्यथा । मायामृषेति विज्ञेया वैश्येव स्वार्थलम्पटा ॥१७७॥ कर्कटी कटुतुम्बीव चेन्द्राण्याः फलवत्तथा । अन्तर्दोषा बहिः—रम्या मायामृषोक्तिरत्र वै ॥ १७८ ॥ मध्वग्रखड्गधारेव घृताग्रविषकुम्भवत् । मायामृषा च विज्ञेया त्याज्येयं शिवमिच्छुभिः ॥ १७९ ॥ स्वार्थसिद्ध्यै च मुग्धानां क्रियते यदि वञ्चना । विरसं फलमेतस्या ज्ञेयं वैषयसौख्यवत् ॥ १८० ॥ विनाशिदृश्यभावानाङ्कृते मा कुरु मा कुरु । मायामृषां सखे जीव ! कथन्ते भवितोद्धृतिः ? ॥१८१॥ स्वादे मधु फले तिक्तश्चौषधं न च गृह्यते । वैपरीत्येन सङ्ग्राह्यं तद्वदत्रापि बुध्यताम् ॥ १८२ ॥ जहिहि जहिहि शीघ्रं स्वापरानर्थभूतम्, त्वमिह विमलबुद्धे ! मायिकाऽतथ्यवादम् । नहि च जगति तेन प्राप्यते मानवांसि, सुरपुरशिवसौख्यं लभ्यते नो परेऽपि ॥ १८२ ॥

अथ मिथ्यात्वशल्योपक्रमः ॥ शास्त्रतत्त्वं निराकृत्य गुरुवाणीन्तथैव च । मिथ्यात्वी खलु स ज्ञेयः शल्यतुल्योऽभिवर्तते ॥ १८४ ॥ सद्वस्तु रोचते नास्मै रोगिण इव शर्करा । मिथ्यात्वदम्भशीलात्म स्वच्छन्दमनुधावति ॥ १८५ ॥ मिथ्यात्वशल्य-

[1] चाण्डालाः । [2] आशरीरम् ।

विद्धांघ्रिरपैयात्कथमध्वनि ? । उत्तमानां यथा येन निर्वाणपुरमाश्रयेत् ॥ १८६ ॥ महारात्रिज्वरक्षेपो यथा पीडां शरीरिणि । कुरुते च तथा दुःखं मिथ्यात्विमानसे भृशम् ॥ १८७ ॥ पारवश्यं[1] कुर्वाणो वधः कष्टाय कल्पते । मिथ्याशल्यस्य तद्वृद्धि देहिनामिह जायते ॥ १८८ ॥ सत्सङ्गवारिणा पूर्वं प्रक्षाल्य स्वच्छतावधि । स्वाध्यायसूचिना पश्चात् मिथ्याशल्यं समुद्धरेत् ॥ १८९ ॥ यावन्मिथ्यात्वशल्येन विद्धपादो नरो भवेत् । कुतः सौख्यं कुतो धर्मः कुतः सद्गतिभावना ॥ १९० ॥ मिथ्यात्वशल्यपीडाऽऽक्के सति देहिनि रोचते । न तपो न गुरोर्वाणी न साधुकर्मसन्ततिः ॥ १९१ ॥ गुरूपदेशसूच्याऽऽशु निष्कास्य शल्यमात्मनः । निर्द्वन्द्वीभूय गच्छेदिष्टं फलमेतन्नृजन्मनः ॥१९२ ॥ कूपमण्डूकसादृश्यम्वहन्मिथ्यात्वभाग्जनः । तत्रैव शीर्यते पापी दुर्गतिं याति सन्ततम् ॥१९३॥

अथ द्यूतव्यसनोपक्रमः ॥ अक्षैर्दीव्यति यो मूढो वित्तार्थं द्यूतमुच्यते । यन्मूलकलहराशिर्दुःखराशिः पदे पदे ॥ १९४ ॥ न सत्यं न कुलाचारो न मिथ्यावादतो भयं । न दया न त्रपा हन्त ! द्यूतसंलग्नचेतसाम् ॥ १९५ ॥ न यशो निन्द्यकार्येण न प्रेम क्लेशतो यथा । विना वृष्टिर्यथा सस्यं तथा द्यूतात्कुतो धनम् ? ॥ १९६॥ अमानो वंशनिन्दादिः कलहः सम्पदां क्षयः । द्वेषमात्सर्यादिवृद्धिश्च द्यूतिनामिमके गुणाः ॥ १९७ ॥ न लज्जा द्यूतिनश्चित्ते न पूज्यानां भयं क्वचित् । कृताकृत्यं न पश्यन्ति मदान्धाः करिणस्त्विव ॥ १९८ ॥ प्रेमवल्लीं विभिन्धन्ते धनलिप्साऽसिधारया । शत्रव इव चेष्टन्ते धिक् द्यूतकेलिलालसान् ॥ १९९ ॥ द्यूतक्रीडा महाव्रीडा द्यूतं सर्वस्वनाशनम् । महान्तोऽपि विनश्यन्ति द्यूतेन क्लेशकारिणा ॥ २०० ॥ धर्मराजोऽपि धर्मात्मा नलोऽपि नीतिमान्नृपः । तेनैव प्राप्तवान् दुःखं धिग् द्यूतञ्च पुनः पुनः ॥ २०१ ॥ यशोऽभिलाषिमर्त्यानां ह्यानन्दाभिकाङ्क्षिणाम् । जातु[2]

---

१ पराधीनता । २ कदा ।

वृत्तिर्नैकाग्रांऽत्र मनसो धूतवर्त्मनि ॥ २०२ ॥

अथ मांसव्यसनोपक्रमः ॥ क्षणविध्वंसिदेहस्य पुष्ट्यै ये पापशालिनः । प्राणैर्वियुज्य मांसानि खादन्ति धिक् च तान् खलान् ॥ २०३ ॥ धृतिः श्रीः कीर्तिरैश्वर्यं सत्यं शौचं दया सुखम् । नश्यन्ति मांसलुब्धानां कुगतिश्च निरर्गला ॥ २०४ ॥ शकलीकृत्य मांसानि ये खादन्ति कुबुद्धयः । स्वात्मानं पातयत्येते पवित्रमपि दुर्गतौ ॥ २०५ ॥ यथा प्रीतिः स्वदेहादौ तथा स्यादन्यमूर्तिषु । साम्राज्यन्तस्य सर्वत्र मुक्तिश्च पाणिपङ्कजे ॥ २०६ ॥ दृष्ट्वा नारीं यथा कामी धनं दृष्ट्वा च तस्करः । मांसादी च पशून् दृष्ट्वा चाचलीति न संशयः ॥ २०७ ॥ येन कृतानि पुण्यानि येन मांसं न खादितम् । फलन्तुल्यन्द्वयोरत्र मनुरप्याह नैगमे ॥ २०८ ॥ विभ्रमो मतिविभ्रंशो दैन्यं व्याधिश्च रौद्रता । निर्दयत्वञ्च पैशाच्यं मांसभोक्तुर्गुणा इमे ॥ २०९ ॥ चर्वयन्ति च ये क्रूराः परास्थीनि रदैरलम् । त एव राक्षसाः सत्यं त एव निरयैषिणः ॥ २१० ॥ पिशितादनतः श्वभ्रं ययौ पापिनिरेवती । श्रेणिकोऽपि ततो लेभे वेदनां निरयोद्भवाम् ॥ २११ ॥ न भोक्तव्यमतो मांसं कस्यापि भूतिमिच्छुना । आत्मवद्भावयेत्सर्वं ततः श्रेयो यथा सुखम् ॥ २१२ ॥

अथ मदिरापानव्यसनोपक्रमः ॥ कम्पयति मनोमोदं सच्चिदानन्ददायकम् । मदिरेयञ्च विज्ञेया सत्क्रियामार्गलोपिनी । ॥२१३॥ भ्राम्यति मस्तकं पूर्वं नेत्रयोर्घूर्णनन्ततः । अङ्गानां मोटनं भूयः पुनर्वैकल्यमात्मनि ॥ २१४ ॥ उच्चाटनञ्च शैथिल्यं मालिन्यं देहसन्धिषु । पतनं स्खलनं भूयः कम्पनं निन्द्यभाषणम् ॥२१५॥ स्तब्धताऽज्ञानता भूयः पारवश्यमशुद्धता । इमे दोषाश्च विद्यन्ते सुरापायिशरीरिणि ॥ २१६ ॥ त्रिभिर्विशेषकम् ॥ न कुलं गणयत्येष न शीलं न च गौरवम् । वृथा हासी वृथा भाषी वृथा-

शीलप्ररूपकः ॥ २१७ ॥ मदान्धनष्टसत्संज्ञो भक्ष्याभक्ष्यबहिर्मुखः । सर्वथा लघुतां याति सत्कुलस्थोऽपि मद्यतः ॥ ॥ २१८ ॥ ॥ युग्मम् ॥ धाराब्धिप्राकारसुदुर्धरा या श्रीवासुदेवोत्तमनाथमान्या । सा द्वारिकाऽपि व्यगमद्विनाशं निदानमत्रापि सुराप्रकोपः ॥ २१९ ॥

अथ वैश्याव्यसनोपक्रमः ॥ विशन्ति सर्वजातीया मानवा यत्र कामतः । वैश्येयम्बत विज्ञेया मायाकपटपेटिका ॥ २२० ॥ मुखे मिष्टा हृदि क्लिष्टा रतीव प्रेमदर्शनात् । हावभावैश्च कालेव केषाञ्चिन्न न रज्जति ॥ २२१ ॥ नदीधारेव सर्वस्वं हरत्येषा शनैः शनैः । हरते विषवल्लीव प्राणानपि धनार्थिनी ॥ २२२ ॥ गलत्कुष्ठनरांश्चापि रूपयौवनवर्जितान् । निर्जीकरोति वैश्येयं गतह्री-र्वित्तकामुकी ॥ २२३ ॥ नटी वा भूतिनी वैषा पिशाची वाऽथ देविका । उपायैर्विविधैः सर्वान् स्ववशीकुरुते शठा ॥ २२४ ॥ सर्वथा निन्द्यवंशाऽपि सर्वथा पापशालिनी । तथापि राजभिर्मान्या परवञ्चनपण्डिता ॥ २२५ ॥ मद्यमांसाशनप्रीतिर्धूतक्रीडामनोगतिः । सर्वभोग्या कथं सेव्या सद्वंशजातमानवैः ? ॥ २२६ ॥ वैश्यासङ्गाच्च नश्यन्ति सद्गुणा देहनामिमे । यशः शीलं कुलं लज्जा कमला मेदिनी प्रजा ॥ २२७ ॥ शवालिङ्गनवज्ज्ञेयं वैश्याऽऽलिङ्गनमत्र वै । न प्रीतिर्न च वा स्नेहो न रागो हन्त ! चान्तरः ॥ २२८ ॥ करिणीस्नेहतो दन्ती यथा गर्ते निपात्यते । वैश्यास्नेहतस्तद्वत्पीड्यन्ते मूढबुद्धयः ॥ २२९ ॥ उपदंशादिरोगाणां वैश्यासङ्गो हि कारणम् । गलत्कुष्ठीव तत्सङ्गी तेन रोगेण पीड्यते ॥ २३० ॥ स्रग्धरा ॥ वैश्येयं पापमूला परधनहरणे पाटवख्यातिमन्ती, निःस्नेहा निःस्वमर्त्यं नयति यमगृहं प्रीतिमान् यः पुराऽऽसीत् । शम्पावद्दृष्टनष्टा भुवि जनहृदयं दिव्यवासो दधाना, आकर्षत्याशु दक्षा त्रिभुवननिपुणा कामचक्रादिवक्ष ॥ २३१ ॥

---

१ वैश्या । २ सन्तति: । ३ मृतकशरीरवत् । ४ विद्युत्वत् । ५ कामकेलिचतुरा ।

अथ खेटव्यसनोपक्रमः ॥ खिद्यन्ते पशवो येन तृणाद्या अपि निर्दयम् । आखेट इति विज्ञेयः पापहेतुर्दुःखप्रदः ॥२३२॥ आखेटयति यो मूढः पिशिताशनलोलुपः । वन्यशूकरांश्च रङ्कादीन् शरीरपुष्टिहेतवे ॥ २३३ ॥ तत्समो नास्ति पापिष्ठस्तत्समो नास्ति राक्षसः । तत्समो नास्ति पैशाचः स एव निरयातिथिः ॥ २३४ ॥ युग्मम् ॥ पैशाचीं वृत्तिमाश्रित्य गह्वरं याति दुष्टधीः । कृत्वा स्कन्धे च शस्त्राणि यमराज इवापरः ॥ २३५ ॥ क्रूरः क्रूरतमः सोऽथ क्रूरदृष्ट्या निभाल्य च । विनापराधमाहन्ति, पशून्केलिरतानपि ॥ २३६ ॥ वियोगीकृत्य तान्मूढः स्वतन्त्रवनचारिणः । कृतकृत्यश्च स्वं मन्ये धिक् तां तादृशचेष्टिनम् ॥ २३७ ॥ घर्मबिन्दुप्रलिप्ताङ्गाः कण्टकक्षतविग्रहाः । क्षुत्पिपासापरिक्रान्ताः स्वजनगणविसंगताः ॥ २३८ ॥ बहवो विजहुः प्राणान् मृगव्यसनाकुलाः । राजानो राजपुत्राश्च लुब्धकानान्तु का कथा ? ॥ २३९ ॥ युग्मम् ॥ आखेटवृत्तिजीवानां क दया परजीविषु ? । छिन्दन्ति परगात्राणि धान्यानीव च कार्षुकाः ॥ २४० ॥ द्रोहो हत्या गुरोर्निन्दा मृगव्यं मांसभक्षणम् । वेश्यासक्तः सुरापानं वाग्पथ्यं परयोषिति ॥ २४१ ॥ विश्वासघातता लोके कृतघ्नत्वन्तथैव च । अमूनि श्वभ्रहेतूनि ज्ञेयानि सूक्ष्मबुद्धिभिः ॥ २४२ ॥ ॥ युग्मम् ॥ आच्छोर्दनमतस्त्याज्यं सुखाभिलाषिणा सदा । अन्यथा न विपद्रमजपुत्रादिवद् भुवि ॥ २४३ ॥ तृणाग्रबिन्दूपमदेहमेनं ज्ञात्वा न कस्यापि वधो विधेयः । सुखं न दृष्टं न च सद्गतिश्च हिंसारतानामिह मानवानाम् ॥ २४४ ॥

अथ चौर्यव्यसनोपक्रमः ॥ परस्वञ्चोर्यते येन कुत्सितेन च कर्मणा । तत्कर्म चौर्यमित्याहुः फलञ्च नरकावनिः ॥ २४५ ॥ कलङ्को नितराञ्चौर्यं सत्कुलेन्दौ विगर्हितम् । वधबन्धनमूलञ्च चौर्यमेव विभाव्यताम् ॥ २४६ ॥ यमदूता इव प्रायः पथि चौरान्

---

१ मृगादीन् । २ वनम् । ३ स्वेद । ४ मृगया ।

सशृङ्खलान् । नयन्ति राजनिर्देशं राजभृत्याश्च पश्यताम् ॥ २४७ ॥ स्वयञ्चौरस्तस्य मित्रं स्थानदो रक्षकस्तथा । व्यापारी सह चौरेण तस्करः पञ्चधा स्मृतः ॥ २४८ ॥ विलसन्ति गुणाः प्रायश्चौरे चैते विलक्षणाः । सद्गुणा यैश्च लुप्यन्ते वज्रेणेव गिरिव्रजाः ॥२४९॥ आनिष्ट्यं निर्दयत्वञ्च कठोरवचनन्तथा । क्रौर्यं शाठ्यञ्च धार्ष्ट्यञ्च निर्भयत्वञ्च धूर्तता ॥ २५० ॥ निन्द्यकार्ये महादम्भो मारणं हरणन्तथा । खात्रदानञ्च भीत्यादौ दौष्कर्म्यं वनितादिषु ॥ २५१ ॥ त्रिभिर्विशेषकम् ॥ फलान्येतानि बोध्यानि चौर्यस्य चौरकर्मणाम् । रज्ज्वङ्कीक्षणं क्वापि भयं दैन्यञ्च पीडनम् ॥२५२॥ निगडैर्बन्धनं सम्यक्-वधो दण्डः पुनः पुनः । ध्वान्तागारप्रवेशश्च शूलिकाऽऽरोपणन्तथा ॥ २५३ ॥ बाह्यिकत्वम्पारवश्यं वियोगः स्वजनैस्तथा । क्षुत्पिपासादिपीडात्वं पश्चात्त्वं निरयस्तथा ॥ २५४ ॥ चौर्यं न कार्यं वसुभूतिवच्च संसारपाथोधिनिमज्जनाय । सौख्यस्य वाञ्छा यदि चेदिहास्ति पुण्यङ्कुरुध्वन्त्विव रौहिणेयः ॥२५५॥

अथ परदारोपक्रमः ॥ दत्ताऽपि च वै दारा कन्यकेऽपरा तथा । परेण सह संयोगे परदारा निगद्यते ॥ २५६ ॥ परवस्त्वपि न ग्राह्यं किमुत वनिता प्रिया । यदर्थं घोरसङ्ग्रामा अभवंश्च धरातले ॥२५७॥ परदाराश्च लिप्सेथ श्रुतिकामो नरोत्तमः । परदाराभिसङ्गेन के के नष्टा न भारते ?॥ २५८ ॥ जिह्वाग्रे मिष्टता भाति हृदये च हलाहलः । विश्वासं खलु कः कुर्यात् स्त्रियश्छद्मनिधेरिह ॥ २५९ ॥ कम्पते हृदयं पूर्वं शैथिल्यमङ्गसन्धिषु । काष्ठाऽवलोकनं भूयो भयं भूरितमन्तथा ॥ २६० ॥ द्रव्यनाशः कीर्तिनाशश्चात्मनो वाच्यता तथा । पित्रोः कुलस्य जातेश्च ह्यपमानञ्जनान्तरे ॥ २६१ ॥ कारागारमहापीडा धिक्-धिक्-मरणन्तथा । उभयत्र महादुःखं परदाराभिगामिनः ॥ २६२ ॥ त्रिभिर्विशेषकम् ॥ हंसमध्ये यथा काको घूकः पक्षिसमूहके । यथा श्वा पशुसन्ताने ग्रहेषु च शनैश्चरः ॥२६३ ॥ निन्द्यो निन्द्यतमस्तद्वन्नरेषु पारदारिकः । कथ्यते निन्द्यते सर्वैर्न मानं लभते क्वचित्

॥ २६४ ॥ युग्मम् ॥ यशो नश्यति मा याति गुहायां क्वापि सत्वरम् । गौरवं ह्रासतामेति मालिन्यमवतिष्ठते ॥ २६५ ॥ सङ्गो न कार्यः परवल्लभायाः सत्कीर्तिकामैर्मरणेऽपि जातु । सहस्रयोनिः सुरनायकोऽभूत् श्रीगौतमस्त्रीपरिघर्षणेन ॥ २६६ ॥ पद्मोत्तरोऽत्र-निपतित्रिदशाङ्गनाभिर्दाराश्रितैरपि युतः परदारकामी । पाञ्चालनाथतनयापरिघर्षणेन नाशत्वमाप नृपकीचकोऽपि तद्वत् ॥ २६७ ॥

अथ पापोपक्रमः ॥ पात्यते येन जीवात्मा नरकादौ निरन्तरम् । पापं तच्च विजानन्तु जीविते सति कष्टदम् ॥ २६८ ॥ श्वासकासादयो रोगा गण्डमालभगन्दराः । विजायन्ते च पापेन पापमेव दुःखकारणम् ॥ २६९ ॥ कालकूटति पीयूषं मित्रश्चापि विपक्षति । वैधेयेति सुधीश्चापि सज्जनो दुर्जनायते ॥ २७० ॥ फेरुः सिंहति सारङ्गः क्रोडति किल्विषादिह । तस्मात्पापं न कर्तव्यं लब्ध्वा नृजन्मदुर्लभम ॥ २७१ ॥ युग्मम् ॥ मालिन्यञ्जायते देहे कर्मण्यपि तथैव च । आपदो भूरि सन्तापाः पापाच्चेह भवन्ति वै ॥ २७२ ॥ दोषायन्ते गुणाः सर्वे मूढताऽऽयाति सर्वतः । विलीयते च सज्ज्ञानञ्चाज्ञानं हृदि भासते ॥ २७३ ॥ पापिनाम्प्रायशो लोके सुताद्या अपि पापिनः । जायन्ते हेतुमद्भावाद्बीजाङ्कुरकनीतितः ॥ २७४ ॥ पापेन यातो नरचक्रवर्ती श्रीब्रह्मदत्तः किल सप्तमीम्वै । पापाद्विरम्यैव ततः सुकार्यं पुण्यञ्च येन भविताऽस्तु मोक्षः ॥२७५॥

अथ सम्यक्त्वोपक्रमः ॥ सम्यक्त्वस्यापि चत्वारः सन्ति भेदा जिनोदिताः । उपशामिकमेकञ्च क्षायोपशामिकन्तथा ॥२७६॥ क्षायिकन्तृतीयं ज्ञेयं साश्वादनश्चतुर्थकम् । वेदकम्पञ्चमं ज्ञेयं ज्ञात्वा यान् याति सत्पदम् ॥ २७७ ॥ युग्मम् ॥ भूषणान्यपि पञ्चैव ज्ञेयानि तस्य सद्गतेः । तीर्थसेवा च दक्षत्वं संस्थैर्योन्नतिभक्तयः ॥ २७८॥ दूषणान्यपि पञ्चैव सम्यक्त्वस्य विभाव्यताम् । यानि

---

१ लक्ष्मी । २. मूर्खायते । ३. पण्डितः ।

त्यक्त्वा च मेधावी जिनदर्शनभाग् भवेत् ॥ २७९ ॥ संस्तुतिः परकीयस्य सार्धं येन च संस्तवः । शङ्का कांक्षा विचिकित्सा ज्ञेयानीति नरोत्तमैः ॥ २८० ॥ धर्ममूलं हि सम्यक्त्वं मूलं स्वर्गसुखस्य च । क्रमशो जायते मोक्षः सम्यक्त्वश्चर्यतान्ततः ॥२८१॥ सम्यक्त्वरत्नदीपेन जाड्यध्वान्तमहर्निशम् । खण्ड्यतां येन जीवात्मा स्वयं शुद्धः शिवम्व्रजेत् ॥ २८२ ॥ सम्यक्त्वनावमाश्रित्य तीर्यताम्भवसागरः । गम्यतां तत्पदं भव्या यस्मिन्सौख्यं निरामयम् ॥ २८३ ॥ सम्यक्त्वज्ञानसूर्यस्य, यावन्नोदय आत्मनि । तावद्धर्मस्य सज्ज्ञानं शास्त्राणाञ्च कुतो भवेत् ॥ २८४ ॥ सम्यक्त्वश्चारुरत्नं विलसति हृदये यस्य पुंसो विशुद्धम्, तद्दीप्त्या खण्डयन् सन् कलिमलममलं वेत्ति धर्मस्य तत्त्वम् । धर्मारूढो हि पश्चाचरति च सुकृतं तेन वृद्धिः सुखानाम्, भुक्त्वा निर्वाणमेति व्यपगतभयकं श्रेणिकाधीशवच्च ॥ २८५ ॥

अथ पुण्योपक्रमः ॥ पूर्यते येन जीवात्मा कुलस्थानि पदस्तथा, तत्पुण्यं भास्वरं निश्चयैताश्चापि निर्भरम् ॥ २८६ ॥ यथा ध्वान्तं दिवा नाथः संकरश्च स्मरभञ्जनः । दारिद्र्यं कल्पशाखीव पापं त्रिपथगामिनी ॥ २८७ ॥ अज्ञानं सद्गुरुर्मोहं ज्ञानं ज्ञानि जिनोदितम् । कर्णव्याधि सुधेवात्र विषञ्जाङ्गुलिकस्तथा ॥ २८८ ॥ अन्यायं नीतिमान् राजा शूरोऽरातिकदम्बकम् । आपदं हन्ति तद्वच्च पुण्यञ्चारु पुराकृतम् ॥२८९॥ त्रिभिर्विशेषकम् ॥ वसन्ते च यथा वल्ल्यो वर्षतो धान्यसम्पदः । तथा पुण्योदये पुंसां फलन्ति सर्वसम्पदः ॥ २९० ॥ रङ्कः सन्नपि यः शीघ्रं जायते धरणीपतिः । तत्रापि प्रबलम्पुण्यं हेतुरत्र विभाव्यताम् ॥२९१॥ अहो पुण्यमहो पुण्यं पुण्यं हि भूतिदायकम् । पुण्येन पूज्यते लोके पुण्येन प्राप्यते शिवः ॥ २९२ ॥ रमावान् भूपतिर्विद्वान्

१ आपणस्थतृणसमूहम् । २ वायुः । ३ नदी । ४ विषवैद्यः ।

रूपवान् कीर्तिमांस्तथा। कुलवान् शीलवान्पूज्यो विद्वद्रोष्ठीप्रतापवान् ॥ २९३ ॥ शूरो दक्षश्च मेधावी परपीडाहरस्तथा । विख्यातः सर्वलोकेषु सर्वकार्येषु शक्तिमान् ॥ २९४ ॥ अमरीसुखभुक्–दानी सखा विश्वस्य बान्धवः । पुराकृतेन पुण्येन जायते भुवि मानवः ॥ २९५ ॥ त्रिभिर्विशेषकम् ॥ तीर्थपो जायते पुण्यात् तेनैव वसुधाधिपः । निर्जरेशोऽपि तेनैव तेनैव विश्ववन्दितः ॥ २९६ ॥ देवारि समितौ जित्वा रामो रावणभूपतिम् । विश्वस्मिन् ख्यातवान्. जातः पुण्यन्तत्रापि कारणम् ॥ २९७ ॥ यद्वाञ्छितमन्वि-श्वतलेऽस्ति लोकाः, पुण्येन तत्केवलमाप्यते वै । पापानि पापागमकारणानि, त्यक्त्वा सुखं पुण्यमिहार्जयन्तु ॥ २९८ ॥

अथ दानोपक्रमः ॥ स्वस्वत्वरहितं यच्च दीयते दानमुच्यते । तत्रैव तुर्यसंज्ञीया विभक्तिः शाब्दिकक्रमः ॥ २९९ ॥ दानोपमा प्रिया वाह्या दानं सर्वार्थसाधनम् । न दानेन समं पुण्यं न दानेन समं तपः ॥ ३०० ॥ दीयते दीयतां देयं दत्तं दास्यति यः पुमान् । अनुमोदनमाधत्ते तत्समो नास्ति पुण्यभाक् ॥ ३०१ ॥ तस्यैव सफलञ्जन्म जननी जनकस्तथा । जीवितं तत्कुलञ्चापि दानार्थी खलु यः पुमान् ॥ ३०२ ॥ रिपवो जन्तवः क्रूराः शठा धूर्ता वराङ्गना । दानदातुश्च मित्राणि भवन्ति पार्श्वगा इव ॥ ३०३ ॥ पुत्रपौत्रादिसौख्यानि भोगाः पञ्चविधास्तथा । ऋद्धयः सिद्धयो लोके प्राप्यन्ते दाननिमि-त्तकम् ॥ ३०४ ॥ काष्ठान्तव्यापिनी कीर्तिः कौबेर्यः खलु सम्पदः । नाकनिर्वाणपद्मा च जायन्ते दानतस्तथा ॥ ३०५ ॥ श्रीश्रेयांसकुमारोऽपि दानेन लब्धकीर्तिमान् । अन्येऽपि बहवो जाता दानेन ख्यातकीर्तयः ॥ ३०६ ॥ अस्मिन्परत्र सुखस-न्ततिकामुकाश्चेद्, दानं ददध्वमनुवासरमुत्ततृष्णा। दानात्तकीर्तितरणीमधिगम्य भूयः प्रान्ताः प्रयान्तु सदनं निरुपाधिरम्यम् ॥३०७॥

१ दिशान्त ।

अथ शीलोपक्रमः ॥ यावज्जीवञ्च यैर्भव्यैः शीलमाकलितं शुभम् । परितः सिद्धयस्तेषां मानता च पदे पदे ॥ २०८ ॥ बर्हिणो नीरदध्वानात्कार्षुकाः कालवृष्टितः । निर्धना धनलाभेन चापुत्राः पुत्रलाभतः ॥ २०९ ॥ योगिनो ज्ञानलाभेन गतनेत्राश्च नेत्रतः । वाग्विलासेन मूकाश्च खञ्जतेः पङ्गवस्तथा ॥ २१० ॥ यथा तुष्यन्ति तद्वच्च शीलतोऽखिलमानवाः । शीलरत्नं ततो धार्यं येन शोभाऽतिसौख्यवी ॥ २११ ॥ त्रिभिर्विशेषकम् ॥ शीलतो मन्त्रसिद्धिः स्यात् तन्त्रसिद्धिस्तथैव च । यन्त्रकार्याणि तेनैव वश्यताऽखिलदेहिनाम् ॥ २१२ ॥ माहात्म्याच्छीलरत्नस्य शूलिका शिबिकाऽभवत् । पश्यतो भूभृतः सम्यक्-श्रीसुदर्शनचित्तिनः ॥ २१३ ॥ विषमः समतां याति रिपवः सुहृदस्तथा । उद्यानञ्च महारण्यञ्जलधिः गोष्पदायते ॥ २१४ ॥ सर्वत्र बन्धुभावश्च सर्वत्र भगिनीमयम् । सर्वत्र चक्रवर्तित्वं विद्यते शीलशालिनः ॥ २१५ ॥ देहे कान्तिर्यशो भूम्यामन्तर्बाह्यारिपूज्जयः । कुलस्य गौरवं लोके निरोऽप्यपि एषा स्तुतिः ॥ २१६ ॥ वीर्यवृद्धिश्च आसिद्धिः प्रभावः प्रतिभाजुषाम् । गोष्ठीषु जायते सम्यक्-शीलयोगप्रभावतः ॥ २१७ ॥ देवर्षिर्नारदोऽसौ सततकलहवान् शीलतः किञ्च मोक्षं, यातः शीलेन सिद्धिर्भवति च विशदा सद्य एवात्र पुंसाम् । श्रीसत्यश्चन्द्रनाथा यदनुभवपथात्-श्लाघनीया बभूवुः, शीलालङ्कारमाप्त्यै कुरुत भुवि जना यत्नमस्त्यस्ति सारः ॥ २१८ ॥

अथ तपःप्रक्रमः ॥ तापयत्यत्र भव्यात्मा येनान्तश्चारिवैरिणः । तत्तपो ज्ञायताङ्कार्यं निरुध्येन्द्रियवाजिनम् ॥ २१९ ॥ तपसा मनसः शुद्धिस्ततो बुद्धेर्विशुद्धता । ततः सन्मार्गधीवृत्तिस्ततश्चिन्तितवस्तुता ॥ २२० ॥ न चारम्भस्तपोमार्गे न दोषकणिकाऽपि च । केवलं ध्यानमाश्रित्य चिन्तनं यत्र चात्मनः ॥ २२१ ॥ तपसा किं न साध्येत तपसा किं न प्राप्यते । तपसैवा-

१ शरीरस्य ।

भवत्सिद्धिः सनत्कुमारचक्रिणः ॥ २२२ ॥ तपसा देहशुद्धिर्या जायते ह्रयसौख्यदा । सा शुद्धिर्धारिणा नात्र पुनश्च मलसम्भवः ॥ २२३ ॥ न दुःखं न च दारिद्र्यं न भयं रिपुरोगतः ॥ जायते च तपोभाजां तपो हि तापनाशकम् ॥ २२४ ॥ न तन्त्रमन्त्रविद्याभिर्न दानैः पुष्कलैरिह । तादृशी जायते सिद्धिर्यादृशी तपसा सताम् ॥ २२५ ॥ श्रीबाहुबलिभूपालो वीरकर्मोदयो महान् । तपसैव महासिद्धिं लेभे सत्वरमुत्तमाम् ॥ २२६ ॥ तपस्तेजोऽर्कभाध्वस्ताज्ञानतैमिरसञ्चयाः । शुद्धस्फटिकसङ्काशद्युतिदेवाङ्गकान्तयः ॥ २२७ ॥ तपोनिष्ठा महासन्तो गतदोषा जितेन्द्रियाः । पूज्यमाना जनैर्यान्ति यथेष्टपदमन्तिमे ॥२२८॥ दृढप्रहारी नितराम्प्रहारी गोविप्रदाराम्रुतजीवहारी । अहो प्रभावात्तपसोऽत्र सोऽपि मुक्तिं ययौ सौख्यमनन्दधानः ॥ २२९ ॥

अथ भावोपक्रमः ॥ शान्तीभूय यो जीवो भावनाम्भावयत्यलम् । सद्भावाद्द्रव्यशत्रूणां नाशिनीं सद्गतिप्रदाम् ॥ २३० ॥ तस्यैव जन्मसाफल्यं तस्यैव जननी शुभा । तेनैव वंशविख्यातिस्तेनैव धरणी मता ॥ २३१ ॥ प्रसन्नचन्द्रराजर्षिर्भावनाभावितान्तरः । क्षणे न मुक्तकर्मा सन् ययौ केवलिनाकृतिम् ॥२३२॥ पञ्चविंशतिप्रकारा भावना दर्शिता जिनैः । भवितस्ताभिरेवात्र सद्गतिं यान्ति सत्वरम् ॥ २३३ ॥ दानशीलतपोवृत्तिर्भावनान्तर्गता सती । स्वर्णसौरभवल्लोके कल्पतेऽभीष्टलब्धये ॥ २३४ ॥ भावनारत्नदीपेन बाह्यमायातमोगणम् । खण्डयित्वाऽऽत्मबोधेन शान्ता यन्तु शिवालयम् ॥ २३५ ॥ भावनामन्तरा चीर्णा क्रियादानादिकन्तथा । विज्ञेया निष्फलैवात्र भस्मराशाविवाहुतिः ॥ २३६ ॥ सद्भावकृतकर्माणि फलं ददति चिन्तितम् । वृष्टीव समये जाता साधुसेवेव वा कृता ॥ २३७ ॥ श्रीचक्रवर्ती भरतो निमग्नो मोहेन राज्ये ह्यमरपुरा वै । आदर्शलोकेक्षणभावतोऽत्र ज्ञानं

१ पूजिता इत्यर्थः ।

स देवे शिवसम्पदाम् ॥ ३३८ ॥

अथ पूजोपक्रमः ॥ पूज्यते च यथा देवो वीतरागो निरन्तरम्। पूजेयं सर्वथा ज्ञेया मनःशुद्धिविधायिनी ॥ २३९ ॥ देवपूजाप्रभावेण नरो नृत्यति सम्पदा । विद्यासौभाग्यधीराज्यलाभतुष्ट्या तथैव च ॥ २४० ॥ देहशुद्धिर्वचःशुद्धिः कार्यसिद्धिश्च पूजया । जायते कोषवृद्धिश्च दुरितौघक्षयस्तथा ॥ २४१ ॥ देवापचितिरक्तानां देवद्रव्योपवर्द्धिनाम् । देवकीर्त्तनमग्नानां न दारिद्र्यादिसम्भवः ॥ २४२ ॥ तेषां सद्मसु राजन्ते कमलाः सुस्थिराः सदा । ज्ञानिनामिव देहेषु कान्तयः शान्तिदायकाः ॥ २४३ ॥ जिनाङ्गपूजनं भक्त्या यः करोति करः सदा । स एव सफलो देहे चान्यथा विफलायते ॥ २४४ ॥ सम्यक्त्वधारिभिर्देवैर्नरैश्चापि सुभावतः । क्रियते देवपूजाऽत्र तिर्यग्भिर्न च नारकैः ॥ २४५ ॥ अघौघभेत्री किल देवपूजा विशुद्धहेतुः किल सैव लोके । जनैस्ततः सैव सदा विधेया विहाय हेयं भवदायि यच्च ॥ २४६ ॥ कालः प्रयाति प्रतिजन्म येषां भक्त्याऽपचित्या जिनपुङ्गवानाम् । धन्या इमे धन्यतमोऽपि वंशो मोक्षोऽपि तेषाङ्करपल्लवस्थः ॥ २४७ ॥ इन्द्रवज्रावृत्तम् ॥ सद्भावनातोऽत्र सदा मनुष्यैरर्चा विधेया जिनपुङ्गवानाम् । सुर्याभवद्या क्रमशो जनानां, मोक्षश्रीश्रियं सद्गुणमातनोति ॥ २४८ ॥

अथ गुरूपक्रमः ॥ विना भृत्यैर्यथा राज्ञां न कार्यञ्चलति स्फुटम् । गुरुम्बिना तथा लोके न ज्ञानजातु जायते ॥२४९॥ घनध्वान्तगतं वस्तु प्राकाश्यं नयते यथा । दीपस्तथा पदार्थानां तत्त्वं बोधयते गुरुः ॥ २५० ॥ न केषाञ्कुरुते हिंसां न मिथ्याभाषणन्तथा । न स्तेयं भामिनीभोगं स गुरुर्गुरुरुच्यते ॥२५१॥ न दोषेहो न वा दम्भी न स्वर्णादिपरिग्रही । न व्यापारी दुराचारी

१ लोटः ।

न रात्रिभोजनप्रियः ॥ ३५२ ॥ संग्रही न च धान्यानां न परानर्थचिन्तकः । न पञ्चविषयासक्तो न परच्छिद्रवीक्षकः ॥ ३५३ ॥ सर्वथा त्यागशीलश्च सर्वथा ब्रह्मधारकः । एतादृशश्च संसेव्यः सद्गुरुर्भवतारकः ॥ ३५४ ॥ गुरुः पिता गुरुर्माता गुरुर्बन्धुः सखा सुहृत् । गुरुरेव सदा सेव्यः संसारार्णवतारकः ॥ ३५५ ॥ यथाऽयो[1] मणिसंसर्गा-द्रुक्मतां याति भास्वते । मूढोऽपि गुरुसद्-दृष्ट्या विद्वत्सु मुकुटायते ॥ ३५६ ॥ संसारो गहनो भाति कार्याण्यपि तथैव च । मन्दप्रज्ञश्च लोकोऽयं विशेषाज्ञानमोहितः ॥३५७॥ सद्गुरुः ज्ञानदीपेन खण्डयञ्जाड्यसन्ततिम् । सन्मार्गे गमयत्येतान्, बोधयन् वस्तुनो गुणान् ॥ ३५८ ॥ यस्याश्रित्य पदं नित्यं यान्ति यास्यन्ति ये ययुः । सत्पथं बहवो भव्याः स गुरुर्विश्ववल्लभः ॥३५९॥ एकाक्षरप्रदाताऽपि सन्मार्गबुद्धिदायकः । विज्ञेयो गुरुरेवासौ नान्यथासिद्धिरस्य वै ॥ ३६० ॥ एवं सन्तारितः साधुः प्रदेशीनृपसत्तमः । दिव्योपदेशदक्षेण श्रीकेशीमुनिना पुरा ॥३६१॥

अथोद्यमप्रक्रमः ॥ सदुद्योगो यथा लोके विद्यते कार्यसाधकः । न तथा च परोपायो दृष्टः श्रुतश्च कश्चन ॥ ३६२ ॥ नश्यति तेन दारिद्र्यमालिङ्गति रमा स्वयम् । उद्यमशालिनं लोके लभ्यते तेन सत्सुखम् ॥ ३६३ ॥ भोज्यस्थालीमुखाग्रेऽपि ढौकिता किंकरादिभिः । विनापाणिं मुखे कृत्वा नोदरपरिपूर्णता ॥३६४॥ आलस्यं सर्वदोषाणां दुःखानामपि कारणम् । कूपमण्डूकवद्धन्त नश्यन्त्यालस्यभाजिनः ॥३६५॥ दैवन्दास्यति किन्तेन चोक्तिरेषा च तन्द्रिणाम् । इत्थं खलु ब्रुवाणास्ते पीड्यन्ते क्लेशराशिभिः ॥३६६॥ उद्यमेनैव सा राज्ञी रेवती मुक्तिकांक्षिणी । तीर्थपानां पदं लेभे दुर्लभं भोगिनामिह ॥३६७॥ तपस्तेपे पुरा घोरं नाभेयेनापि भूभृता ।

---

१ लोहः ।

मौनभङ्गे च समर्द्धी उद्यमः केन वार्यते ? ॥३६८॥ उपसर्गाश्च ते घोरा दुष्कृता निरन्तरम् । सहिता वीरनाथेन प्रोद्यमस्तत्र कारणम् ॥३६९॥ उद्योगवन्तं रिपवोऽपि लोके चान्येऽपि मित्रादिगणाः स्तुवन्ति । नो दीक्ष्यते तं खलु दैन्यमत्र तस्माज्जनास्तं सुखमाभजध्वम् ॥ ३७० ॥ वैज्ञानिका विज्ञजनाः परे ये जितेन्द्रिया ध्वस्तमहारिमोहाः । ख्याता धरण्यामिह सम्बभूवुर्मन्येऽत्र मुद्योगमलं निदानम् ॥ ३७१ ॥ गुर्वंघ्रिभक्तिविमलो मुनिमुक्तिपद्मः, सारं विचार्य विविधागमनिष्ठमिष्टम् । बोधाय मंक्षु तनुबुद्धिमतामपीह, प्राचीकरदतिगुणं ह्युपदेशदीपम् ॥ ३७२ ॥

## ॥ अथ ग्रन्थकर्तृप्रशस्तिः ॥

आनन्दादिमहीध्रसूरिविमलाः सिद्धाचलोद्धारका, मोहध्वान्तदिवाकराः समभवन् राजत्तपागच्छपाः ।
श्रीपंन्यासमहर्द्धिर्वैमलमुनिस्तत्पट्टपद्मानना, जातः कीर्तितकीर्तिर्वैमलमुनिस्तत्पादपाथोऽलिकः ॥ १ ॥
तत्कामाञ्चमतिर्वभूव सुतपा वीरादिसद्वैमल--श्चासीत्तच्चरणारविन्दमधुपो माहोदयो वैमलः ।
तत्पट्टस्थप्रमोदवैमलमुनिः ख्यातोऽजनी सम्वभौ, तत्पाटे शुशुभेऽमले मणिमुनिः पंन्यासचूडामणिः ॥ २ ॥

तत्पाटं समलञ्चकार मतिमानुद्योतपंन्यासक–स्तद्वामोत्सवितिधीविलासविदितः श्रीदानवाचंयमः ।
रेजे [illegible]गुणो बभूव सुधर्मी सौभाग्यमावैमलः ॥ ३ ॥
तत्पट्टाचलकूटकेसरिसमो दिव्यप्रतापेद्धितो, नानाशास्त्रविलक्षणान्तर्गतिर्ब्रह्मव्रतमाश्रितः ।
आसीन्मुक्तिगुरुश्च वैमलमुनिस्तेनोपदेशाभिधे । ग्रन्थोऽकारि क्षणात्परं सुरपुरं मध्ये च पूर्तिम्विना ॥ ४ ॥
श्रीमुक्तिपंन्यासपदाब्जवृत्तिना, पंन्यासरङ्गेण गुरूदयार्थिना ।
तस्याभिपूर्तिर्विमलाऽतिचक्रे , भाषा बुधैः सा च विचारणीया ॥ ५ ॥
तर्काङ्काङ्कयशोङ्कवत्सरयुते मासेऽसिते श्रावणे, चन्द्रे सप्ततिथौ समाप्तिमगमद् ग्रन्थः स्वभावोज्ज्वलः ।
धन्ये सादडिसंज्ञके सुनगरे सच्छ्रेष्ठिवर्गाश्रिते, श्रीमन्मुक्तिमनीषिसद्गुरुकृपादृष्ट्या महार्थप्रदः ॥ ६ ॥
नाम्नोपदेशप्रादीपो ग्रन्थोऽज्ञानतमोरविः । भूयाद्भद्राय भव्यानां सागरान्तमहीस्थितिः ॥ ७ ॥

श्रीमत्तपागच्छमहाकाशवासरमणि–शासनसम्राट्–जङ्गमयुगप्रधान–कनकाचलतीर्थषोडशोद्धारक–क्रियोद्धा-
रक–सूरिचक्रचक्रवर्ति–श्रीमदानन्दविमलसूरीश्वरपट्टधरपरम्परासमायात–सुशिष्यरत्न–तपोनिष्ठ–नैगमतत्त्वावबोधद-
क्षधिषणान्वित–श्रीमत्पण्डितऋद्धिविमलगणिपट्टवारिधिपूर्णशशाङ्क–श्रीपण्डितकीर्तिविमलगणिपट्टालङ्कार–ब्रह्मवर्म-
क्षपितकर्मतिमिर–सत्पथाचारचारि–श्रीपण्डितवीरविमलगणिपट्टपाथोजभास्कर–प्रशस्तोमजेगीयमानकीर्तिनिकुरम्ब-
सततोदय–श्रीपण्डितमहोदयविमलगणिपट्टासीनतत्क्रमकरन्दसरोरुहस्वादैकचञ्चरीक–निखिलासुमत्प्रमोदकारि–
श्रीपण्डितप्रमोदविमलगणिपट्टाभरणविशिष्टशिष्टाचरणलब्धप्रभावनिर्मलीकृतजगन्मण्डल–श्रीपण्डितमणिविमलगणिप-
ट्टकेदारवारिदोपमशमितनिःशेषप्राणिनिकरतापोद्भूतयशश्चय–श्रीपण्डितउद्योतविमलगणिकमनीयचरणारविन्दविलस-
न्मधुपवृत्तिसद्देशनादानदक्षश्रेणीविदित–श्रीपण्डितदानविमलगणिपट्टोत्तुङ्गगिरिकूटकण्ठीरवोपम–परमदयोदधि–
योगनिष्ठ–तपागच्छाधीश–श्रीपण्डितदयाविमलगणिमेदुरतमपादकमलरोलम्बायमानसद्भाग्यभाजन–श्रीपण्डितसौ-
भाग्यविमलगणिपट्टपूर्वाचलदिवाकर–बालब्रह्मचारी–विविधसंस्कृतग्रन्थनिर्माणदक्षधीविराजितसकलसिद्धान्तवाचस्प-
तिचारित्रचूडामणि–विद्वत्प्रकाण्डश्रीपन्यासश्रीमुक्तिविमलगणिविरचितः उपदेशप्रदीपः समाप्तिमगादिति॥ १४॥



॥ श्रीउपदेशप्रदीपः समाप्तः ॥

ॐ ह्रीँ श्रीपार्श्वनाथाय नमः ॥

श्री मुक्तिविमलजी जैन ग्रन्थमाला-ग्रन्थाङ्कः १९

विश्ववन्दनीय-तपोनिष्ठ-तपागच्छाधिपति पं. श्रीदयाविमलगणि-श्रीमत्-शांतमूर्ति-

पं. श्रीसौभाग्यविमलगणि-पादपद्मेभ्यो नमः

सकलसिद्धांतवाचस्पति-अनेकसंस्कृतग्रन्थप्रणेता-पू. पंन्यासप्रवर-श्रीमुक्तिविमलगणिविरचितः

# पद्यात्मकोपदेशप्रदीपः।

परमपूज्य-व्याख्यानवाचस्पति-पंन्यासश्रीरंगविमलगणिवरोपदेशेन

श्री मुक्तिविमलजी जैन ग्रन्थमालाकार्यवाहक-नगरशेठ मणिलाल मोहनलालेन प्रकाशितः

संशोधकः-चन्द्रिकाप्रणेता साहित्याचार्य पं. माधवानन्दशास्त्री

वीर सं. २४७०    ज्ञानसूरि सं. ११८    वि. सं. २०००    मुक्ति सं. २६

पञ्चशतप्रतयः । मूल्यं वाचनमननम् ।

प्राप्तिस्थान---

नगरशेठ मणिलाल मोहनलाल दोसी

ठे० दोशीवाडो

मु. विजापुर (उ. गुजरात)

मुद्रकः-

शेठ गुलाबचंद देवचंद

आनंद प्रेस-भावनगर

# नम्र निवेदन

दरेक विद्वान् पुरुषो जाणे छे के—श्री वीतराग प्रभुना शासनमां चार अनुयोग छे, तेमां एक चरणकरणानुयोग छे. तेमां भव्यात्माओना उपकारने माटे महापुरुषोए रचेला सुरहस्य युक्त संस्कृत, अर्धमागधी, प्राकृतादि भाषामां अनेक ग्रन्थो मोजुद छे, तो पण वर्तमान काळमां अल्पबुद्धिवाला जीवोना उपकारने माटे पूर्वाचार्य महापुरुषोए रचेला ग्रन्थोने अनुसरीने स्वर्गस्थ परमपूज्य विश्ववंदनीय अखंड ब्रह्मचारी सकलसंवेगीशीरोमणि तपोनिष्ठ तपागच्छाधिपति श्रीमत्पंन्यासप्रवर श्री दयाविमलजी गणिवरान्तेवासी पूज्य शांतमूर्ति पण्डितप्रवर श्रीमत्पंन्यास श्री सौभाग्यविमलजी गणिवरान्तेवासी परमपूज्य सकलसिद्धांत-वाचस्पति अनेकसंस्कृतग्रन्थप्रणेता सच्चरित्रचूडामणि बालब्रह्मचारी पंन्यासप्रवर श्री मुक्तिविमलजीगणिवर्ये पोतानी २५ वर्षनी अल्प जीवनचर्यानी अंदर विद्वत्ताभरेला ने वैराग्यरसथी भरपूर अनेक ग्रन्थो गीर्वाण भाषामां रच्या छे. तेमांथी केटलाक ग्रन्थो तेमनी हयातिमां ज श्री दयाविमलजी जैन ग्रन्थमाला तरफथी प्रकाशित थई चूक्या हता ने बीजा केटलाक तेमणे रच्या हवा पण ते संपूर्ण थया पहेलां जैन धर्ममां कोहीनुर हीरा तरीके प्रसिद्धि पामेला ते प. पू. गुरुदेव अमदावादमां विक्रम सं. १९७४ ना भाद्रपद सुदि ४ ना बपोरना बार वागे स्वर्गवास पाम्या तेथी तेमना शिष्यवर्गने ज नहि बल्के समस्त जैन समुदायने अत्यंत खोट पडी छे.

तेओश्रीनी हयातिमां ने स्वर्गगमन बाद जे ग्रन्थो प्रकाशित थया तेनी यादी नीचे प्रमाणे छे–

आगमवांचनमीमांसा स्वोपज्ञ टीका युक्त, प्रश्नोत्तररत्नाकर, पर्युषण कल्पमाहात्म्यम्, पू. पंन्यास श्री दयाविमलजी अष्टक स्वोपज्ञ टीका युक्त, संस्कृत चैत्यवंदन स्वोपज्ञ टीकायुक्त, श्री संभवनाथ स्तोत्र उपर टीका, गणधरवाद, ज्ञानपंचमी कथा पद्य, पोषदशमी कथा गद्य, मेरुत्रयोदशी कथा पद्य, रोहिणी पर्व कथा पद्य, श्री ज्ञानविमलसूरिचरित्र पद्य, लघु चैत्यवंदन चोवीसी पद्य, जैनगुणस्तोत्र मुक्तावली पद्य, श्री महावीर अष्टक, श्री मणिभद्र यक्ष अष्टक, श्री सरस्वती अष्टक, श्रीहेमचंद्रसूरि अष्टक, संस्कृतमां पर्वतिथिनी स्तुतिओ, पुनः गुर्जरगिरामां स्तवनो, चैत्यवंदनो, गहुंलीसंग्रह इत्यादि.

तेओश्रीना अप्रसिद्ध अपूर्ण ग्रन्थोनी यादी नीचे प्रमाणे–

श्रीकल्पसूत्रनी कल्पमुक्तावली नामनी टीका, उपदेशप्रदीप पद्यात्मक, पद्यात्मक तत्त्वबोधतरंगिणी, अशोकरोहिणी चरित्र, श्रीपालचरित्र आदि.

ते ग्रन्थोमांथी प्रथम ग्रन्थ तरीके " पद्यात्मकोपदेशप्रदीप " नामनो ग्रन्थ तेओश्रीना विद्वान् शिष्यरत्न पूज्यपाद जैनागमपरिशीलनशाली जैनशासनप्रभावक व्याख्यानवाचस्पति कविदिवाकर आबालब्रह्मचारी महान् तपस्वी अनुयोगाचार्य श्रीमत्पंन्यासप्रवर श्री रंगविमलजी महाराज साहेबजी गणिवर्यना अति परिश्रमथी तेमज उपदेशथी आ ग्रन्थने ड्रोइंगपेपरमां ने सारा टाइपमां प्रकाशित कराव्यो छे तो आ ग्रन्थने सहृदयी विद्वद्वर्ग स्वीकार करी तेनो लाभ उठावशे एटले आ प्रकाशन सफल थयुं मानीश.

# ' आभार–प्रदर्शन '

अमारी श्री मुक्तिविमलजी जैन ग्रन्थमाला तरफथी १४ ग्रन्थो बहार पडी चूक्या छे ने आ पंदरमुं पुष्प छे, जेनुं नाम छे "श्री पद्यात्मकोपदेशप्रदीप" जेना कर्ता परमपूज्य सकलसिद्धांतवाचस्पति अनेकसंस्कृतग्रन्थप्रणेता विद्वन्मार्तण्ड सच्छास्त्र-चूडामणि ब्रह्मचारी श्रीमत्पंन्यासप्रवर श्री मुक्तिविमलजी गणिवर्य छे. आ ग्रंथने प्रसिद्ध करवामां तेओश्रीना विद्वद्वर्य शिष्यरत्न व्याख्यानवाचस्पति कविदिवाकर महातपस्वी बालब्रह्मचारी श्रीमत्पंन्यासप्रवरश्री रंगविमलजी महाराज साहेबजी गणिवर्यना सदुपदेशथी नीचेना सद्गृहस्थो तरफथी द्रव्यसहाय मली छे ते आभार साथे स्वीकारवामां आवे छे-

रु. १००) शेठ धरमचन्द दयालचन्दनी पेढी ज्ञातिन्होरा ज्ञानखातामांथी सादडी.
रु. ५०) श्री तपागच्छ श्री संघ ज्ञानखातामांथी फलोधी
रु. ५०) शेठ उदयराजजी पुनमचन्द कानुगा ,,
रु. ५०) शेठ रेखचंदजी खिंवराज लुंकड ,,
रु. ३५) शेठ नेमिचन्दजी अमरचन्द वैद्य फलोधी
रु. २५) शेठ तेजमालजी राजमलजी लुंकड ,,
रु. २०) शेठ चांदमलजी माणेकलाल लुंकड ,,
रु. २०) शेठ गुलाबचन्दजी मेलापचन्दजी कानुगा ,,

आ ग्रन्थनुं सांगोपांग संशोधनकार्य साहित्याचार्य पंडित माधवानंद शास्त्रीजीए कर्युं छे. आ पुस्तक छापवा माटे जैन पत्रना अधिपतिजीए काळजी राखी छे ते माटे संस्था तेनी आभारी छे.

आ ग्रन्थनी शुद्धि माटे यथाशक्ति प्रयत्न करवामां आव्यो छे छतां दृष्टिदोष तथा प्रेसदोष विगेरेने लईने कोई स्थले स्खलना जणाय तो विद्वद्वर्ग क्षमा करे ने साथे सुचना करे.

फलोधी<br>टे० तपागच्छनी धर्मशाला<br>सं. १९९९ आ. शु. १०<br>[ मारवाड ]

ली.<br>पूज्यपाद प्रसिद्धवक्ता अनुयोगाचार्य श्रीमत्पंन्यासश्री रंगविमलगणि-<br>चर्यान्तेवासी मुनि कनकविमल